MOOTRA MOCHANA SOOKTAM

विद्मा शरस्यं पितरंम् पर्जन्यंम् शतवृंष्ण्यम् ।
तेनां ते तन्वे(३)- एशङ् करं पृथिव्या न्तें निषेचंनं बहिष्टें -
अस्तु बालितिं ।।१।।

विद्मा शरस्यं पितरंम् मित्रं शतवृंष्ण्यम् ।
तेनां ते तन्वे(३)- एशङ् करं पृथिव्या न्तें निषेचंनं बहिष्टें -
अस्तु बालितिं ।।२।।

विद्मा शरस्यं पितरँ वरुंणं शतवृंष्ण्यम् ।
तेनां ते तन्वे(३)- एशङ् करं पृथिव्या न्तें निषेचंनं बहिष्टें -
अस्तु बालितिं ।।३।।

विद्मा शरस्यं पितरं ञ्चन्द्रं शतवृंष्ण्यम् ।
तेनां ते तन्वे(३)- एशङ् करं पृथिव्या न्तें निषेचंनं बहिष्टें -
अस्तु बालितिं ।।४।।

विद्मा शरस्यं पितरं सूर्यम् शतवृंष्ण्यम् ।
तेनां ते तन्वे(३)- एशङ् करं पृथिव्या न्तें निषेचंनं बहिष्टें -
अस्तु बालितिं ।।५।।

यदान्त्रेषुं गवीन्यो र्यद्वस्तावधि संश्रुंतम् ।
एवा ते मूत्रंम् मुच्यतां बहिर्बालितिं सर्वकम् ।।६।।

प्र तें भिनद्मि मेहंनँ वर्त्रँ वेशन्त्या - इंव ।
एवा ते मूत्रंम् मुच्यतां बहिर्बालितिं सर्वकम् ।।७।।

विषिंत न्ते वस्तिबिलं संमुद्रस्योंदधे रिंव ।
एवा ते मूत्रंम् मुच्यतां बहिर्बालितिं सर्वकम् ।।८।।

यथेंषुका परापंत दवंसृष्टाधि धन्वंन : ।
एवा ते मूत्रंम् मुच्यतां बहिर्बालितिं सर्वकम् ।।९।।

PDF CREATED BY SHRI P R IYER AND PRIYA R IYER
05 Dec 2021